चतुर्दशः पाठः

# जन्तु-शाला



भोपालनगरात्
२२-१०-०५

प्रियमित्र गोपाल !

सस्नेहं नमस्ते।

अत्र सर्वं कुशलं तत्रापि कुशलं भवतु। मम त्रैमासिकी परीक्षा समाप्ता। अहं जनकेन सह जन्तुशालाम् अगच्छम्। किं त्वं जानासि? जन्तवः अस्माकं मित्राणि सन्ति। जन्तुशालायां जन्तवः अस्माकं मनांसि रञ्जयन्ति। तत्र अहम् व्याघ्रम्, जम्बूकम्, ऋक्षम्, गजम्, सिंहम्, वानरम्, मकरम्, शशकम्, हरिणम् च अपश्यम्। अहं तत्र शुकम्, बकम्, सारसम्, मयूरम्, हंस तथा च अन्यान् खगान् अपि अपश्यम्।

सिंहः उच्चैः गर्जति। वानरः पञ्जरे भ्रमति, उत्पतति च। तस्य पुच्छं दीर्घं भवति। मकरः जले निवसति। मयूरः नृत्यति। सः अस्माकं राष्ट्रियः पक्षी अस्ति। अलम् अतिविस्तरेण, त्वं अत्र स्थितस्य प्राणिसङ्ग्रहालयस्य अवलोकनार्थं भोपालनगरे मम गृहं आगच्छ।

तव जनकाय जनन्यै च नमः। स्वस्ति अनुजाय। पत्रोत्तरं शीघ्रं लिखतु।

तव मित्रम्,
सुरेशः

## शब्दार्थाः

| | | | |
|---|---|---|---|
| जन्तुशाला | = चिड़िया घर | अस्माकं | = हमारा |
| शुकम् | = तोता को | रञ्जयन्ति | = मनोरंजन करते हैं |
| बकम् | = बगुला को | व्याघ्रम् | = बाघ को |
| जम्बूकम् | = सियार को | उच्चैः | = जोर से |
| ऋक्षम् | = रीछ को | गर्जति | = गरजता है |
| गजम् | = हाथी को | निवसति | = रहता है |
| वानरम् | = बन्दर को | अलं | = बस |
| मकरम् | = मगर को | आगच्छ | = आओ |
| शशकम् | = खरगोश को | नेष्यामि | = ले जाऊँगा |
| हरिणम् | = हरिण को | अनुजाय | = छोटे भाई को |

## अभ्यासः

१. एकवाक्येन उत्तरं लिखत—

(क) वानरः कुत्र भ्रमति?

(ख) कः उच्चैः गर्जति?

(ग) मकरः कुत्र वसति?

(घ) जन्तुशालायां कः नृत्यति?

२. रिक्तस्थानं पूरयत—

(क) तव --------- नमः।

(ख) मयूरः अस्माकं --------- पक्षी अस्ति।

(ग) जन्तवः अस्माकं --------- सन्ति।

(घ) सिंहः --------- गर्जति।

३. निम्नलिखिततालिकया वाक्यरचनां कुरुत—

| | | |
|---|---|---|
| वानरः | खगान् | सन्ति |
| सिंहः | फलानि | विकसन्ति |
| अहम् | वृक्षे | अपश्यम् |
| सरोवरे | उच्चैः | गर्जति |
| वृक्षेषु | कमलानि | वसति |

४. रिक्तस्थानं पूरयत–

| यथा– गुरुः | तरुः | भानुः | शिशुः |
|---|---|---|---|
| (क) गुरोः | ............ | ............ | ............ |
| (ख) गुरूणाम् | ............ | ............ | ............ |
| (ग) गुरौ | ............ | ............ | ............ |

५. त्वं सन्दीपः असि। तव मित्रम् अस्ति सुनीलः।
तव विद्यालयस्य वार्षिकोत्सवस्य वर्णनं कृत्वा मित्राय एकं पत्रं लिख।

## योग्यताविस्तारः –

- योग्यशब्दं चित्वा उचितस्थाने लिखत–

काकः, पिकः, गजः, व्याघ्रः, धेनुः, शशकः, मयूरः, सिंहः, अजा, मार्जारः, सर्पः, अश्वः, हरिणः, भल्लूकः, वानरः, श्वानः, महिषी, चटका।

| वन्यपशवः | ग्राम्यपशवः |
|---|---|
| | |

- पशुपक्षीणां चित्रावल्याः निर्माणं कुरुत। तेषां नामानि संस्कृते लिखत।